

# দ্বাদশজ্যোতির্লিংগস্তোত্রম্-সৌরাষ্ট্রদেশে বিশদেঽতিরম্যে

https://www.chalisa.online

|| দ্বাদশজ্যোতির্লিংগস্তোত্রম্ ||

সৌরাষ্ট্রদেশে বিশদেঽতিরম্যে জ্যোতির্ময়ং চংদ্রকলাবতংসম্ ।
ভক্তিপ্রদানায় কৃপাবতীর্ণং তং সোমনাথং শরণং প্রপদ্যে ॥ 1॥
শ্রীশৈলশৃংগে বিবুধাতিসংগে তুলাদ্রিতুংগেঽপি মুদা বসংতম্ ।
তমর্জুনং মল্লিকপূর্বমেকং নমামি সংসারসমুদ্রসেতুম্ ॥ 2॥
অবংতিকায়াং বিহিতাবতারং মুক্তিপ্রদানায় চ সজ্জনানাম্ ।
অকালমৃত্যোঃ পরিরক্ষণার্থং বংদে মহাকালমহাসুরেশম্ ॥ 3॥
কাবেরিকানর্মদয়োঃ পবিত্রে সমাগমে সজ্জনতারণায় ।
সদৈবমাংধাতৃপুরে বসংতমোংকারমীশং শিবমেকমীডে ॥ 4॥
পূর্বোত্তরে প্রজ্বলিকানিধানে সদা বসংতং গিরিজাসমেতম্ ।
সুরাসুরারাধিতপাদপদ্মং শ্রীবৈদ্যনাথং তমহং নমামি ॥ 5॥
যাম্যে সদংগে নগরেঽতিরম্যে বিভূষিতাংগং বিবিধৈশ্চ ভোগৈঃ ।
সদ্ভক্তিমুক্তিপ্রদমীশমেকং শ্রীনাগনাথং শরণং প্রপদ্যে ॥ 6॥
মহাদ্রিপার্শ্বে চ তটে রমংতং সংপূজ্যমানং সততং মুনীংদ্রৈঃ ।
সুরাসুরৈর্যক্ষ মহোরগাঢ্যৈঃ কেদারমীশং শিবমেকমীডে ॥ 7॥
সহ্যাদ্রিশীর্ষে বিমলে বসংতং গোদাবরিতীরপবিত্রদেশে ।
যদ্দর্শনাত্পাতকমাশু নাশং প্রযাতি তং ত্র্যংবকমীশমীডে ॥ 8॥
সুতাম্রপর্ণীজলরাশিযোগে নিবধ্য সেতুং বিশিখৈরসংখ্যৈঃ ।
শ্রীরামচংদ্রেণ সমর্পিতং তং রামেশ্বরাখ্যং নিয়তং নমামি ॥ 9॥
যং ডাকিনিশাকিনিকাসমাজে নিষেব্যমাণং পিশিতাশনৈশ্চ ।
সদৈব ভীমাদিপদপ্রসিদ্দং তং শংকরং ভক্তহিতং নমামি ॥ 10॥
সানংদমানংদবনে বসংতমানংদকংদং হতপাপবৃংদম্ ।
বারাণসীনাথমনাথনাথং শ্রীবিশ্বনাথং শরণং প্রপদ্যে ॥ 11॥
ইলাপুরে রম্যবিশালকেঽস্মিন্ সমুল্লসংতং চ জগদ্বরেণ্যম্ ।
বংদে মহোদারতরস্বভাবং ঘৃষ্ণেশ্বরাখ্যং শরণম্ প্রপদ্যে ॥ 12॥
জ্যোতির্ময়দ্বাদশলিংগকানাং শিবাত্মনাং প্রোক্তমিদং ক্রমেণ ।
স্তোত্রং পঠিত্বা মনুজোঽতিভক্ত্যা ফলং তদালোক্য নিজং ভজেচ্চ ॥
॥ ইতি শ্রীমদ্শংকরাচার্যবিরচিতং
দ্বাদশজ্যোতির্লিংগস্তোত্রং সংপূর্ণম্ ॥

|| https://www.chalisa.online ||